# संस्कृतवार्ता

दिनाङ्क :-17.11.2024

प्रातः - 06:55

## प्रधानमन्त्री – नाइजीरिया यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य अबुजानगरे नाइजीरिया-देशस्य राष्ट्रपतिना बोला-अहमद-टिनुबू-इत्यमुना साकं मन्त्रणां करिष्यति। श्रीमोदी नाइजीरियायाः द्वि-दिवसीय-यात्रायै ह्यः रात्रौ अबुजानगरं सम्प्राप्तवान्। विगतेषु सप्तदशवर्षेषु कस्यापि भारतीयप्रधानमन्त्रिणः प्रथमा नाइजीरिया यात्रा विद्यते। प्रधानमन्त्री मोदी राष्ट्रपतिः टीनुबू इत्येषः च नाइजीरिया-भारत-देशयोः मध्ये रणनीतिक-सहभागित्वस्य समीक्षां समाचरिष्यतः अथ च द्विपक्षीय-सम्बन्धान् अग्रे वर्धयितुं विविधेषु अवसरेषु चर्चां करिष्यतः। वार्तानन्तरम् अनेकेषु सन्धिपत्रेषु हस्ताक्षरस्य सम्भावनापि वर्तते। एतदनन्तरं प्रधानमन्त्री नाइजीरियायां भारतीय-प्रवासिभ्यः सम्बोधनमपि करिष्यति। तदनु श्वः श्रीमोदी राष्ट्रपतिना लुइस-इनासियो-लूला-दा-सिल्वा इत्यनेन आयोक्ष्यमाणे जी-20 शिखरसम्मेलने भागग्रहणाय द्विदिवसीययात्रार्थं ब्राजीलदेशस्य रियोडिजेनेरियो-नगरं प्रति यास्यति। ध्यातव्यमस्ति भारतं ब्राजील-दक्षिणाफ्रीका-देशाभ्यां सह जी-20 इत्यस्य शिखरसम्मेलनस्य भागमस्ति इति। अपि च प्रचल्यमाणस्य जी-20 शिखरसम्मेलनस्य चर्चासु सक्रियत्वेन योगदानं प्रददाति। कार्यक्रमावधौ प्रधानमन्त्री विभिन्नेषु वैश्विकप्रसङ्गेषु भारतस्य स्थितिं प्रकटयिष्यति। भारतेन आयोजिते वॉयस ऑफ द ग्लोबल-साउथ-इत्यस्मिन् शिखर सम्मेलनेऽपि चर्चां विधास्यति। तृतीये अन्तिमे च यात्रायाः सोपाने प्रधानमन्त्री अस्य मासस्य नवदशतः एकविंशति दिनाङ्कं यावत् गुयानादेशाय यास्यति।

## भारत-खाद्यान्नप्रेषणम्

भारतेन भूयोऽपि पञ्चविंशत्यधिक-चतुश्शतमीट्रिकटन-मितं यावत् खाद्य पदार्थाः खाद्यान्नानि च सूरीनामदेशस्य सामाजिक-कल्याण-कार्यक्रमाय प्रेषितानि। भारतस्य सूरीनामदेशेन सह घनिष्ठः मैत्रीपूर्णः मधुरश्च सम्बन्धो विद्यते। यो हि शताधिकवर्षेभ्यः भारतीय-प्रवासिनाम् आगमनेन सांस्कृतिक-जनानां मध्ये जातेन सम्पर्कद्वारा सुदृढो जातः। षड्सप्तत्यधिक-नवदशशततमे वर्षे भारत-सूरीनामयोः मध्ये राजनयिक-सम्बन्धानां स्थापनानन्तरं नैकासाम् उच्चस्तरीयानां यात्राणाम् आदानप्रदानमपि जातम्। तदनु द्विसहस्रतमे वर्षे नवदिल्ल्यां सूरीनाम-दूतावासः अपि उद्घाटितः।

वायुगुणवत्ता

वायुगुणवत्ता-प्रबन्धनायोगेन ग्रेडेड-रिस्पांस-एक्शन-प्लान इत्येतं नियमं क्रियान्वितं कर्तुं सम्बद्ध-अधिकारिभ्य: राष्ट्रिय-राजधानी-क्षेत्रेषु वायुप्रदूषणस्य सर्वाणि चिन्हितानि स्थलानि प्राथमिकतां प्रदातुं निर्दिष्टानि। आयोगेन राष्ट्रिय-राजधानी-क्षेत्रे नियमान् काठिन्येन परिपालयितुं ह्य: नवदिल्ल्याम् एकं समीक्षोपवेशनं समनुष्ठितम्।

ट्रम्प-ऊर्जाविभाग:

नवनिर्वाचितेन अमरिकादेशीयेन राष्ट्रपतिना डोनाल्ड-ट्रम्प-इत्यनेन क्रिस-राइट-इत्येष: स्वरूच्यनुसारं ऊर्जाविभागप्रमुख: नियुक्त:। राइट-इत्येष: लिबर्टी एनर्जी इत्येतस्य प्रमुखकार्यकारि-अधिकारी अपि च संस्थापको विद्यते। यो हि जीवाश्म-ईन्धनस्य उपयोगस्य प्रबलसमर्थको वर्तते।

हॉकी प्रतिस्पर्धा

महिलानां एशियाई-चैम्पियन्स-ट्राफी इत्येतस्यां हॉकीति प्रतिस्पर्धायाम्, अद्य बिहारस्य राजगीर-हॉकी-क्रीडाङ्गणे भारतम् अन्तिमाया: सामूहिक-प्रतिस्पर्धाया: द्वन्द्वे जापानदलेन साकं क्रीडिष्यति। प्रतिस्पर्धाया: अस्या: प्रसारणं पादोनपञ्चवादने भविष्यति।

संस्कृत-साप्ताहिकी

श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनतो भविष्यति। कृपया श्रृण्वन्तु।

।।इति वार्ता:।।